2.4.6 QLM Supporting Documents

1.

May 2018 - December 2018

## ब्रह्मर्षिधाम्नि आयोजिता व्याकरणशास्त्रकार्यशाला



श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १८ तः ३०.१२.२०१८ पर्यन्तं श्रीब्रह्मर्षिसंस्कृतमहाविद्यालये ''धातूद्देश्यकाः प्रत्ययाः'' इति विषयमाश्रित्य अभिनवा एका व्याकरणकार्याशाला समायोजिता आसीत्। अस्यां विविधमहाविद्यालयेभ्यः प्रायः ६२ विद्यार्थिनः अध्ययनाय समागताः। डॉ. पुष्पादीक्षितमहोदयया स्वीयया विशिष्ट्या शैल्या धातूद्देश्यकाः प्रत्ययाः इति विषये नितरामध्यापनकर्म अक्रियत। उद्घाटनसत्रे ब्रह्मर्षिसंस्कृतमहाविद्यालय-नडियादप्रमुखाः पूज्याः पद्मश्रीडाह्याभाई शास्त्रिणः, श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतिवर्याः आचार्याः गोपबन्धुमिश्रमहाभागाः, ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्राचार्यचराः डॉ. कृष्णप्रसादनिरौलाः, प्रो. वसन्तकुमारभट्टाश्च उपस्थिताः भूत्वा प्रासङ्गिकोद्बोधनम् अकार्षुः। प्रो. विनोदकुमार झा अस्याः कार्याशालायाः प्रमुखसंयोजकः, डॉ. दिपेशकतिरा च संयोजकः आस्ताम्। स्थानीयसंयोजकरूपेण श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. अमृतलाल भोगायता तथा च स्थानीयसहसंयोजकः डॉ. क्षितीश्वरनाथपाण्डेयः अविद्यत।



2.



## 'संस्कृतशिक्षणम् अङ्कीयमानविकी च' इत्यस्मिन् विषये समायोजिता विश्वविद्यालये विशिष्टा कार्यशाला



डॉ. आनन्दमिश्रवर्यं सभाजयन् कुलपतिवर्यः

ऐषमः श्रीसोमनाथसंस्कृतविश्वविद्यालयेन जर्मनीस्थेन विश्वविद्यालयद्वयेन समं शैक्षिकः अभिबन्धः कृतः। तत्र अन्यतमेन हैडल्बर्गविश्वविद्यालयेन सह जातस्य शैक्षिकाभिबन्धस्य अङ्गतया श्रीसोमनाथसंस्कृतविश्वविद्यालये २०१९ तमस्य वर्षस्य मार्चमासस्य एकादशात् दिनात् चतुर्दशं दिनं यावत् 'संस्कृतशिक्षणम् अङ्कीयमानविकी च' इत्यस्मिन् विषये विशिष्टा कार्यशाला समायोजिता। विश्वविद्यालयस्य मान्याः कुलपतिचरणाः काले काले कार्यशालायामुपस्थाय मार्गदर्शनमकुर्वन्। हैडल्बर्गविश्वविद्यालयस्य प्राध्यापकः डॉ. आनन्द मिश्र महोदयः अस्यां कार्यशालायामारम्भतः आन्तमुपस्थाय मार्गदर्शनमकरोत्। अस्यां कार्यशालायां विश्वविद्यालयपरिसरे पठन्तः षट् छात्राः, विश्वविद्यालयसम्बद्धमहाविद्यालयेभ्यश्च चत्वारः छात्राः, चत्वारः गुरवः, विश्वविद्यालयस्य ग्रन्थपालः, सङ्गणकाभियन्ता च भागमगृह्णन्। अस्याः कार्यशालायाः मुख्यसंयोजकः प्रो. विनोद कुमार झा संयोजकः च डॉ. दीपेश कतिरा आसीत्।



कार्यशालायाः किञ्चन दृश्यम्

3.




## प्रो. वशिष्ठत्रिपाठिवर्याणां विशिष्टव्याख्यानम्




'न्यायसिद्धान्तमुक्तावली' इति विषये विशिष्टव्याख्यानम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य दर्शनसङ्कायेन दिनाङ्क ०३-०२-२०१७ तः ०५-०३-२०१७ दिनाङ्कपर्यन्तं न्यायशास्त्रे विशिष्टव्याख्यानमाला [illegible]योजिता । तत्र विशिष्टप्रवक्तृरुपेण सम्पूर्णानन्दस्य न्यायविभागाध्यक्षक्षचराः न्यायवैशेषिकदर्शने प्रथितयशाः राष्ट्रपतिसम्मानिताः प्रो. वशिष्टत्रिपाठिवर्याः "न्यायसिद्धान्तमुक्तावली" इति विषयमादाय जिज्ञासून् छात्रान् अध्यापकाँश्च अन्वगृहीषुः । श्रीसोमनाथसंस्कृतविश्वविद्यालयः स्वकीये नवमदीक्षान्तसमारोहे



विशिष्टव्याख्यानं श्रुणवन्तः श्रोतारः

[illegible] ह्याचार्यान् "विद्यावाचस्पति" (डी. लिट्.) इत्युपाधिना सभाजयामास। अथ तेषां त्रिदिवसात्मकमिदं न्यायशास्त्रीयं वैदुष्यपूर्णव्याख्यानं सर्वान् छात्रान् अध्यापकाँश्च तुतोष । अस्मिन् कार्यक्रमे दर्शनविभागस्य सहायकाचार्या डो. उमामहेश्वरी तथा च च्छात्राः ध्रुविनपण्ड्या, रिधमपण्ड्या इत्याद्याः महत्साहाय्यम् आचेरुः । अस्याः न्यायशास्त्रीयविशिष्टव्याख्यानमालायाः समग्रं संयोजनं दर्शनङ्कायाध्यक्षेण डो. जानकीशरणाचार्ये सुष्ठु सम्पादितम्।

4.

# वाक्यार्थपरिषद्- २०१५-१६

"वाक्यार्थे वर्द्धते विद्या" इति वचनं पुरस्कृत्य विगतवर्षे श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिष्ठापितेयं "वाक्यार्थपरिषद्" अस्मिन् वर्षेऽपि प्रगतिपथि प्रवर्तते । वाक्यार्थपरिषदः प्रारम्भः अक्टोबरमासादभवत् । वेदवेदाङ्गसंकायस्याध्यक्ष: प्राध्यापक: डॉ. शत्रुघ्नपाणिग्राही तथा पुराणविभागस्य प्राध्यापक: डॉ. पङ्कजकुमाररावल: चलितवर्षस्य अस्या: परिषदः सञ्चालनाय संयोजकरूपेण वर्तेते । तत्रोद्घाटनसमारोहस्य कार्यक्रमे मान्या: कुलपतय: प्रो.अर्कनाथचौधरीमहाभागा आध्यक्ष्यं पदमलङ्कृत्य वाक्यार्थपरिषद: द्वितीयवर्षस्य प्रथमाधिवेशने प्रथमवक्तारूपेण " विद्यादय अर्था: द्योत्या: वाच्या: वा " इति विषयमाधारीकृत्य स्ववाक्यार्थविचारान् सम्यक् रूपेणोपस्थापितवन्त: । इयं परिषदुत्तरोत्तरं कुलपतिमहाभागानां मार्गदर्शनेन विश्वविद्यालयस्य सर्वे प्राध्यापकानां शास्त्रावगाहनेन छात्राणां विद्याविकासो निरन्तरं भवति तदस्ति अस्या: परिषद: शुभफलम् ।

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रतिवर्षं स्वोत्कर्षाय शास्त्रसेवायै छात्रलाभाय च विविधेषु विषयेषु शास्त्रावगाहनं कर्तुं प्राध्यापकेभ्यः वाक्यार्थपरिषदाख्यः कार्यक्रमः प्रवर्त्यते)। २०१५-२०१६ इत्यस्मिन् वर्षे डॉ. पङ्कजकुमार रावलः, डॉ. शत्रुघ्नपाणिग्राही अनयोः संयोजने अयं प्रकल्पः समनुष्ठितः।(अस्यां परिषदि प्राध्यापकाः अध्यापनबिन्दून् अभ्यासक्रमं विहाय वा सर्वोपकारकं विषयं विचिन्वन्ति। तेन बहूनां शास्त्राणां विषयाणां संस्पर्शः भवति।) विश्वविद्यालयेनानेन सत्रारम्भे कुलपतिवर्याणां प्रो. अर्कनाथचौधरिमहोदयानां व्याकरणविषयावगाहनरतानां वाक्यार्थपरिषदि लाभः गृहीतः। ततश्च क्रमेण सर्वैरपि प्राध्यापकैः व्याख्यानं कृतम्। अत्र सूची प्रदीयते।

**प्रथमाधिवेशनम् - १७-१०-२०१५**
अध्यक्षः - प्रो. अर्कनाथचौधरीमहाभागा - विध्यादय अर्थाः द्योत्याः वाच्याः वा
मञ्चसञ्चालकः - डॉ. शत्रुघ्नपाणिग्राही

**द्वितीयाधिवेशनम् - १८-०१-२०१६**
अध्यक्षः - डॉ. नरेन्द्रकुमारपण्ड्या
मञ्चसञ्चालकः - डॉ. शत्रुघ्नपाणिग्राही
१. प्रो. देवेन्द्रनाथपाण्डेयः - वैदिकदेवशास्त्रम्
२. डॉ. दीपेशकतिरा - भावविकारविमर्शः
३. डॉ. जानकीशरणः - भारतीयदर्शनेषु पाठसमालोचनपद्धतिः

**तृतीयाधिवेशनम् - १६-०२-२०१६**
अध्यक्षः - प्रो. देवेन्द्रनाथपाण्डेयः
मञ्चसञ्चालकः - डॉ. पङ्कजरावलः
१. प्रो. विनोदकुमारझा - नधातुलोपअर्धधातुके"इतिसूत्रार्थविचारः
२. डॉ.डायाभाई मोकरीया - संस्कृतसाहित्ये पित्रोः गौरवम्
३. डॉ. अमृतलालः भोगायता - अनन्योक्तेरन्योक्तेरीपदास्वादः

**चतुर्थाधिवेशनम् - २१-०३-२०१६**
अध्यक्षः - प्रो. विनोदकुमारझा
मञ्चसञ्चालकः - डॉ. शत्रुघ्नपाणिग्राही
१. डॉ. महेन्द्रकुमारः ए. दवे - रम्या रामायणी कथा
२. डॉ.ललितः पटेलः - ध्वनिः, ध्वनिप्रपञ्चः, तत्प्रयोजनञ्च
३. बी. उमामाहेश्वरी - व्याप्तिस्वरूपविचारः

**पञ्चमाधिवेशनम् - ०१-०४-२०१६**
अध्यक्षः - डॉ. नरेन्द्रकुमारपण्ड्या
मञ्चसञ्चालकः - डॉ. पङ्कजरावलः
१. डॉ. शत्रुघ्नपाणिग्राही - मन्त्रार्थविचारः
२. डॉ.रमेशचन्द्रशुक्लः - ज्योतिषशास्त्रे नवविधकालमानविचारः
३. डॉ. कार्तिकः पण्ड्या - डॉ.गोस्वामीबलभद्रप्रसदशास्त्रीकृत 'इन्दिराजीवनम्' शतक काव्य का काव्यशास्त्रीय अध्ययन

**षष्ठाधिवेशनम् - ०५-०४-२०१६**
अध्यक्षः - डॉ. नरेन्द्रकुमारपण्ड्या
मञ्चसञ्चालकः - डॉ. शत्रुघ्नपाणिग्राही
१. डॉ. नरेन्द्रकुमारपण्ड्या - काव्यदोषविमर्शः
२ डॉ.पङ्कजकुमाररावलः - पाठ्यन्ते पशुभिर्नराः
३. रविन्द्रःएस्.काले - Copyrights in India : An Introduction
४. उमाशङ्करः झा - ग्रहाणां गतिविचारः

## वाक्यार्थपरिषद्व्याख्यानमाला २०१६-२०१७

वाक्यार्थपरिषद् २०१६-१७ सत्रस्य व्याख्यानमाला दिनाङ्क ०२-०६-२०१६ तः २-०६-२०१७ वर्षैकपर्यन्तं प्रचालितवन्तः। अस्मिन् वर्षे सप्ताधिवेशनानि जातानि तेषु प्रथमाधिवेशनं १५-०६-२०१६ दिनाङ्के अभवत्। अस्य सत्रस्य सत्राध्यक्षाः मुख्यवक्ता च माननीयकुलपतयः प्रो. अर्कनाथ-चौधरीमहाभागा आसन्। महोदयस्य विषयः **धात्वार्थविमर्शः** आसीत्। द्वितीयवक्तृरूपेण डॉ. दशरथजादवः कुलसचिवः, विषयः **विश्वविद्यालयस्य विकासे प्रशासनस्य भूमिका** तृतीयवक्तृरूपेण प्रो. विनोदकुमारझामहोदया आसन् विषयः **सूत्रार्थविमर्शः** आसीत्।


द्वितीयाधिवेशनं ०६-०१-२०१७ दिनाङ्के जाते अस्य सत्रस्य सत्राध्यक्षाः प्रो. विनोदकुमारझामहोदया आसन् वक्तृरूपेण प्रो. देवेन्द्रनाथ पाण्डेय, विषयः पाश्चात्त्यविदुषां संस्कृतानुरागः, डॉ. नरेन्द्रकुमार एल्. पण्ड्यामहोदयस्य विषयः **श्रीमद्भगवद्गीतानिभावितभावाः**, डॉ. महेन्द्रकुमार दवे महोदयानां विषयः **शान्तोऽपि नवमो रसः।**

अतः परं तृतीयाधिवेशनं २०-०१-२०१७ दिनाङ्के जातं अस्य सत्रस्य सत्राध्यक्षाः प्रो. देवन्द्रनाथपाण्डेयमहोदया आसन् वक्तृरूपेण डॉ. पङ्कजकुमाररावलः, विषयः **चातुर्वर्ण्यं मया सृष्टम्**, डॉ. डाह्यालाल मोकरिया, विषयः **मित्रस्य परिभाषा**, डॉ. अमृतलाल भोगायता, विषयः **रमणीयार्थप्रतिपादनम्** तथैव चतुर्थाधिवेशनं दिनाङ्क ३०-०१-२०१७ दिनाङ्के जातम् अस्य सत्रस्य सत्राध्यक्षाः प्रो. विनोदकुमारझामहोदयाः पुनः सत्राध्यक्षाः तथा वक्तृरूपेण प्रो. अर्चना दूबे विषयः **रसविमर्शः**, डॉ. जानकीशरणआचार्यः विषयः **संस्कृते संशोधनोपयोगिकोशग्रन्थाः** संगणकश्च, डॉ. दीपक कतिराः विषयः **आधुनिकभारतीयभाषासुदृढाः मूलतः संस्कृतभाषायाः वचोविच्छित्तयः** पञ्चमाधिवेशनं ०६-०२-२०१७ दिनाङ्के जातं सत्राध्यक्षाः डॉ. नरेन्द्रकुमार एल् पण्ड्या एवं वक्तृरूपेण डॉ. शत्रुघ्नपाणिग्राहीः विषयः **पूर्वयागस्य वैशिष्ट्यम**, डॉ. बी. उमामाहेश्वरीः विषयः **प्रत्यक्षप्रमाणस्य अभिनवालोचनम्**, प्राध्यापिका बारैया दृष्टिः विषयः **"અષ્ટાંગયોગમાં પ્રાણાયામ"** तथैव षष्ठाधिवेशनं १८-०२-२०१७ दिनाङ्के जातम्।

## वाक्यार्थपरिषद् २०१७-२०१८

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे अध्यापकानां कृते छात्राणां लाभाय वाक्यार्थपरिषद आयोजनं भवति तथैव अस्मिन् वर्षे अपि १५-०९-२०१७ तमे दिनाङ्के अस्याः परिषद उद्घाटनमभवत्। सत्राध्यक्षाणां माननीयानां कुलपतिवर्याणाम् अर्कनाथचौधरी महाभागानां **प्रमाणमीमांसा** इत्यस्मिन् विषये व्याख्यानमभवत्।

# प्राध्यापकानां शास्त्रीयविचारविनिमयाय प्रवृत्ता वाक्यार्थपरिषद्




वाक्यार्थपरिषदः २०.०२.२०१९ दिनाङ्के प्रवृत्तस्य अधिवेशनस्य किञ्चन दृश्यम्

श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिवर्षमिव अस्मिन्नपि वर्षे प्राध्यापकानां अधीतिबोधाचरणाय शास्त्रीयविचारविनिमयाय च वाक्यार्थपरिषत् प्रवृत्ता। अत्र विचारितविषयाणां शोधलेखानां च 'वाक्यार्थज्योतिः' इति नाम्ना प्रकाशनं भवति। परिषदः अस्याः प्रथममधिवेशनं गतवर्षस्य जुलैमासे तत्कालीनस्य कुलपतिमहोदयस्य प्रो. महेन्द्रकुमार दवे महाभागस्य आध्यक्ष्ये सम्पन्नम्। ततः प्रभृतिः प्रतिमासं विश्वविद्यालयस्य एकैकस्य वरीयसः प्राध्यापकस्याध्यक्ष्ये परिषदः एकैकमधिवेशनं सम्पन्नम्। शास्त्रीयविषयैः सममितिहासशरीरविज्ञानादि-विषयाः अपि परिषदः विभिन्नेषु अधिवेशनेषु चर्चिताः। प्रकृतवर्षस्य मार्चमासस्य अष्टमे दिने वर्तमानकुलपतेः प्रो. गोपबन्धु मिश्र महोदयस्य आध्यक्ष्ये परिषदः चरममधिवेशनं पूर्णतामगात्। डॉ. दीपेश कतिरा, श्रीनित्यानन्द ओझा च अस्मिन् वर्षे परिषदः संयोजकत्वमवहताम्।

# वाक्यार्थपरिषदः उद्घाटनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिवर्षम् अध्यापकानां छात्राणां शास्त्रज्ञानसम्पादनाय वाक्यार्थपरिषत् समायोज्यते। अस्मिन् २०१९-२० तमे शैक्षिकवर्षे अस्याः परिषदः उद्घाटनसत्रसमन्वितं प्रथमाधिवेशनं १९.१२.२०१९ दिनाङ्के कुलपतेः प्रो. गोपबन्धुमिश्रस्य आध्यक्ष्ये समभवत्।




अस्मिन् अवसरे कुलसचिवः डॉ. दशरथजादवः, अनुस्नातक-विभागाध्यक्षा प्रो. अर्चनादुबे, प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, व्याकरण-विभागाध्यक्षः प्रो. विनोदकुमारझा, अन्ये प्राध्यापकाः छात्राश्च समुपातिष्ठन्। अस्य उद्घाटनसत्रस्य आरम्भः दीपप्रज्वालनेन जातः, तदनु अस्याः परिषदः संयोजकेन दर्शनप्राध्यापकेन डॉ. जानकीशरण आचार्येण सर्वेषां स्वागतं विधाय अस्याः वाक्यार्थपरिषदः प्रास्ताविकं भाषणं व्यधायि। अस्मिन् प्रथमाधिवेशने वैयाकरणः प्रो. विनोदकुमारझा "समासादिवृत्तिविमर्शः" इति विषयं पूर्वोत्तरपक्षाभ्याम् अमण्डयत्। स्वीयाध्यक्षीयोद्बोधने कुलपतिः प्रो. गोपबन्धुमिश्रः "कृत्प्रत्ययानां विश्लेषणम्" इति विषयम् आदाय सर्वोपकारकं छात्रप्रेरकं सरलं व्याख्यानम् अकरोत्। २०१९-२० शैक्षिकवर्षे अस्याः वाक्यार्थपरिषदः संयोजकरूपेण दर्शनविभागस्य प्राध्यापकः डॉ. जानकीशरण आचार्यः, शारीरिकशिक्षकः डॉ. जयेशमुङ्गरा च कार्यं कुरुतः।

5.



**10-12/11/2017**
दिनांकेषु
श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य व्याकरणसंकायेन आयोजितायां त्रिदिवसीयायां शास्त्रपुनश्चर्याकार्यशालायां समुपस्थिता: वक्तार: श्रोतारश्च



10-12/11/2017
दिनांकेषु
श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य व्याकरणसंकायेन आयोजितायां त्रिदिवसीयायां शास्त्रपुनश्चर्याकार्यशालायाम् उद्घाटनसत्रे मंचस्था: महानुभावा:



10-12/11/2017
दिनांकेषु
श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य व्याकरणसंकायेन आयोजितायां त्रिदिवसीयायां
शास्त्रपुनश्चर्याकार्यशालायां पत्रवाचनं कुर्वन्
डा. वाचस्पति मिश्र:



10-12/11/2017
दिनांकेषु
श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य व्याकरणसंकायेन आयोजितायां
त्रिदिवसीयायां शास्त्रपुनश्चर्याकार्यशालायां पत्रवाचनं कुर्वन्
प्रो. विनोद कुमार झा



10-12/11/2017
दिनांकेषु
श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य व्याकरणसंकायेन आयोजितायां
त्रिदिवसीयायां शास्त्रपुनश्चर्याकार्यशालायाम् उद्घाटनसत्रे भाषमाण:
कुलपति: प्रो. अर्कनाथ चौधरी

6.



## संस्कृतसप्ताहोत्सवः शास्त्रीयव्याख्यानमाला च






संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमः

श्री सोमनाथसंस्कृतविश्वविद्यालयः १३/०८/२०१६ दिनाङ्कतः १९/०८/२०१६ दिनाङ्कं यावत् संस्कृतसप्ताहोत्सवेन साकं शास्त्रीयव्याख्यानमालाकार्यक्रमं समायोजितवान् । विश्वविद्यालयपरिसरे समायोजितेऽस्मिन् कार्यक्रमे विशिष्टानि शास्त्रीयव्याख्यानानि विविधाः स्पर्धाश्चायोजिताः।

- १३/०८/२०१६ तमे दिनाङ्के सरस्वतीवन्दनया सह दीपप्रज्वालनपूर्वकं कार्यक्रमस्योद्घाटनसमारोहः मान्यानां महानुभावानां प्रो.पङ्कजचांदेमहोदयानां, प्रो. अभिराजराजेन्द्रमिश्रमहोदयानां, डो. गौतमपटेलमहोदयानां च समुपस्थितौ, प्रो. अर्कनाथचौधरीमहाभागानाम् अध्यक्षतायां सम्पन्नः। तत्र प्रो. पङ्कजचांदेमहोदयाः नाट्यशास्त्रानुसारं नाट्यकलाविकासस्योपरि महनीयं शास्त्रीयव्याख्यानम् अकुर्वन् ।प्रो. अभिराजराजेन्द्रमिश्रमहोदयानां गीर्वाणगिरा आधुनिकसाहित्यशास्त्रविषयकं विशिष्टव्याख्यानमाकर्ण्य उपकृताः सर्वे। एवञ्च डो. गौतमपटेलमहाभागानां सारस्वतप्रवचनेनालङ्कृताः वयम् । सत्रद्वये कृतेऽस्मिन् उद्घाटनसमन्विते शास्त्रीयव्याख्यानमालाकार्यक्रमे डो. ललितपटेलः, डो.जानकीशरणः आचार्यः च मञ्चसञ्चालनम् अकुरुताम् ।

- १४/८/२०१६ तमे दिनाङ्के गुजरातविश्वविद्यालयस्य संस्कृतविभागनिदेशकचराः प्रो. वसन्तकुमारभट्टमहोदयाः "पाणिनीयव्याकरणे अर्थः विवक्षा च" इत्यस्मिन् विषये अश्रुतपूर्वं शास्त्रीयं व्याख्यानम् अकुर्वन् । अस्य सत्रस्य मञ्चसञ्चालनं डो. दीपेश-कतिरामहोदयः अकरोत् । दिवसेऽस्मिन् तिस्रः स्पर्धाः जाताः निबन्धलेखनस्पर्धा, कथाकथनस्पर्धा, समूहगानस्पर्धा च ।तासां विवरणम्-

| | |
|---|---|
| कथाकथनस्पर्धा - | १- मयूरः जानी |
| | २-जयेशः शियाणी |
| | ३ - अरुणः पाण्डेयः |
| निबन्धलेखनस्पर्धा - | १- अरुणः पाण्डेयः, आकाशः पुरोहितः च |
| | २ - मयूरः जानी, जयदेवः च |
| | ३ - जयेशःशियाणी, कचोट धरमः च |
| समूहगानस्पर्धा - | १- आकाशः, मयूरः, जयः, राकेशः, हार्दिकः, अजयः |
| | २. अनुपमातिवारीवृन्दः |
| | ३ - राहुलझावृन्दः |






संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमे छात्रैः प्रस्तूयमानाः सांस्कृतिक कार्यक्रमः





१५/०८/२०१६ तमे दिनाङ्के ध्वजवन्दनकार्यक्रमः विश्वविद्यालयपरिसरे सम्पन्नः। कुलपतयः प्रो. अर्कनाथचौधरी-महोदयाः वाक्पुष्पैः अन्तेवासिनः अध्यापकान् च आभाषितवन्तः। डॉ. जानकीशरणः आचार्यः डॉ. जयेशमुंगरा च अस्य कार्यक्रमस्य संयोजकत्वम् अकुरुताम्।

- १६/०८/२०१६ तमे दिनाङ्के महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य कुलपतयः प्रो. रमेशचन्द्रपण्डामहोदयाः समुपस्थाय व्याकरणविषयस्य विशिष्टेन व्याख्यानेनास्मान् अलमकुर्वन्। श्रीउमाशङ्करझा महोदयः अस्य व्याख्यानसत्रस्य मञ्चसञ्चालनम् अकरोत्। दिवसेऽस्मिन् स्फूर्तिस्पर्धा अपि आयोजिताऽऽसीत्। स्पर्धायामस्यां विश्वविद्यालयेऽधीयानाः चतुर्विंशतिः छात्राः भागमवहन्। सर्वेऽपि इमे षट्सु गणेषु विभाजिताः। स्पर्धायां चत्वारि चक्राणि आसन्। प्रत्येकस्मिन् चक्रे वेद-व्याकरण-दर्शन-पुराण-ज्यौतिष-साहित्य-सम्बद्धाः समसामयिकाश्च प्रश्नाः पृष्टाः। स्पर्धायामस्यां विजेतारः इमे छात्राः अभवन्
  - प्रथमस्थाम् - अरुणः पाण्डेयः, अजयः राज्यगुरुः, आशिषः मिश्रः, मणिकान्तः दुबे
  - द्वितीयस्थानम् - जिगरः भट्टः, शिवमः चौबे, सोनपालः ऋषिः, ध्रुविनः जोषी
  - तृतीयस्थानम् - राहुलकुमारः झा, राजकुमारः झा, केशवः पाण्डेयः, परमेशः मिश्रः। डॉ. दीपेशः कतिरा अस्याः स्पर्धायाः संयोजकत्वम् ऊढवान्।

- १९/०८/२०१६ तमे दिनाङ्के समस्यापूर्तिस्पर्धा वक्तृत्वस्पर्धा च आयोजिते। तयोः विवरणम् -

| | |
|---|---|
| समस्यापूर्तिस्पर्धा - | १ - अरुणः पाण्डेयः, २ - जिगरः भट्टः |
| वक्तृत्वस्पर्धा - | १ - अरुणः पाण्डेयः, १ - जिगरः भट्टः |
| | २ - रोहितः बालासरा, ३ - हर्षः केवलः |

अस्मिन्नेव दिवसे **UGC NET-JRF Gujarat SLET** प्रशिक्षणवर्गस्योद्घाटनसमन्वितः संस्कृतसप्ताहोत्सवसम्पूर्तिकार्यक्रमः पुरस्कारार्पणपूर्वकं समजायत। तत्र प्रो. देवेन्द्रनाथपाण्डेयमहोदयाः, डॉ. नरेन्द्रकुमारपण्डया महोदयाश्च सारस्वतातिथिभाषणेन उपकृतवन्तः। प्रो. अर्कनाथचौधरी-महोदयाः छात्रान् अध्यापकान् च श्लाघनीयवचोविन्यासेन आध्यक्षीयभाषणेन प्रेरितवन्तः उत्साहितवन्तश्च।

सम्पूर्णस्य संस्कृतसप्ताहोत्सवस्य शास्त्रीयव्याख्यानमालाकार्यक्रमस्य च सफलतापूर्वकम् उचितानुचितविवेकपुरस्सरं मार्गदर्शनमकुर्वन् अनुस्नातकविभागाध्यक्षाः प्रो. विनोदकुमारझामहोदयाः, संस्कृतमहाविद्यालयस्य प्राचार्याः डॉ. नरेन्द्रकुमारपण्डयामहोदयाश्च। अस्याखिलस्य कार्यक्रमस्य संयोजकत्वं निरूढवन्तः डॉ. ललितकुमारपटेलः, डॉ. जानकीशरणः आचार्यः, श्री उमाशङ्करझा च।





साहित्यसङ्कायस्य विशिष्टव्याख्यानमालाया भाषमाणः प्रो. पङ्कज चौदमहाभागः

7.

## वेद–वेदाङ्ग संकायायोजित–<br>त्रीदिवसीय शास्त्रपुनश्चर्या कार्यशाला

सामख्यालीस्य सन्तश्री सन्ध्यागिरीबापु संस्कृतवेदविद्यालये श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वेदवेदाङ्गसङ्कायेन आयोजिता त्रिदिवसीया शास्त्रपुनश्चर्याकार्यशाला (११–०९–२०१७ तः १३–०९–२०१७ पर्यन्तम् जाता) तत्र कार्याशालायां विश्वविद्यालयस्य सम्बद्धमहाविद्यालयेषु पञ्चत्रिंशत् विद्वांसोऽध्यापकाः शोधच्छात्रा भागग्रहणं कृतवन्तः। तत्र अध्ययनविषय आसीत् ऋगवेदभाष्यभूमिकांवेदशास्त्रस्य', 'लघुपाराशरीज्योतिषशास्त्रस्य। अस्यां कार्यशालायां येषां महानुभवानां व्याख्यानं सञ्जातं ते सन्ति प्रो. लक्ष्मीश्वर झा महाभागाः, प्रो. श्रीकिशोरमिश्रमहोदयाः, डॉ. राजेन्द्रपण्ड्या महोदया, डॉ. शत्रुघ्नपाणिग्राहिमहोदयाः, डॉ. रमेशचन्द्रशुक्लामहोदयाः. डॉ. अश्विनभाई राजगोरमहशयाः, प्रो. एच. एम पाण्ड्ये महोदयाः, डॉ. राजेन्द्रप्रसाद शुक्लामहोदयाः। अस्यां कार्यशालायाम् आहत्य नव व्याख्यानानि जातानि । अस्य कार्यक्रमस्य संयोजकः डॉ. शत्रुघ्नपाणिग्रहिमहोदयस्य सविधे कार्यशालायाः पूर्णं विवरणं विद्यते।

## दर्शनविषये व्याख्यानकार्यक्रमः



दर्शनशास्त्रे व्याख्यानं विदधानः प्रो. रामकिशोरत्रिपाठिवर्यः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-दर्शनसङ्कायद्वारा १८-०७-२०१९ दिनाङ्के "दर्शनशास्त्रीयव्याख्यानमाला" आयोजिता आसीत्। व्याख्यानमालायामस्यां विद्यानगरीस्थ-श्रीसम्पूर्णानन्दसंसकृतविश्वविद्यालयस्य दर्शनसङ्कायाध्यक्षाः प्रो. रामकिशोरत्रिपाठिनः समागताः आसन्। तैः "दर्शनशास्त्रस्य सामान्यपरिचयः, तस्य वैशिष्ट्यम्" इति विषयमधिकृत्य सरलया पद्धत्या, दर्शनशास्त्राध्ययनस्य आवश्यकता, आधुनिकयुगे दर्शनानां वैशिष्ट्यम्, पुरुषार्थचतुष्टयादिविषयाः सुबोध्यया शैल्या सप्रमाणं युक्तिभिश्च व्याख्याताः। व्याख्यानमालायामस्याम् श्रीसोमनाथसंस्कृत-विश्वविद्यालस्य प्रधानपुरुषाः किञ्च वैयाकरणेषु मूर्धन्याः कुलपतिवर्याः प्रो. गोपबन्धुमिश्रवर्याः ध्यक्षपदमलङ्कृतवन्तः। तथा च राष्ट्रियसंस्कृतविद्यापीठम्-तिरुपतितः समायाताः प्रो.गणपति के. भट्टमहोदयाः, प्रो.जयप्रकाशनारायण द्विवेदी, प्रो.देवेन्द्रनाथपाण्डेयमहोदयाः मञ्चासीनाः आसन् । सभायाः सञ्चालनं दर्शनविभागस्य प्राध्यापकः डॉ. जानकीशरण आचार्यः अकरोत्। धन्यवादज्ञापनं सङ्कायाध्यक्षा डा. उमा महेश्वरी व्यज्ञापयत्।

# साहित्यशास्त्रे विशिष्टव्याख्यानम्



साहित्यशास्त्रे विशिष्टव्याख्यानं विदधानः प्रो. रहसविहारीद्विवेदी

श्रीसोमनाथसंस्कृतविश्वविद्यालयः काले काले विविधविधाशाखासु पण्डितमण्डितविदुषां विशिष्टव्याख्यानि आयोजयति। अस्मिन् क्रमे २१-०९-२०१९ तमे दिनाङ्के साहित्यसङ्कायेन जबलपुरस्थ-राणीदुर्गावती-विश्वविद्यालयस्य प्राप्तावकाशप्राध्यापकस्य प्रो. रहसविहारीद्विवेदिवर्यस्य साहित्यशास्त्रे विशिष्टं व्याख्यानं समायोजि। संशोधनकार्यं कथं सम्पादनीयमित्यस्मिन् विषयेऽपि बोधदायकं शोधदृष्टिप्रदञ्च व्याख्यानं प्रो. द्विवेदिवर्येण प्रदत्तम्। अस्मिन् विशिष्टव्याख्याने साहित्यविभागस्य प्राध्यापकाः अन्तेवासिनश्च सार्धहोराद्वयव्यापिविशिष्टव्याख्यानम् अश्रौषुः। नैकोदाहरणपुरःसरं स्वकीयविशिष्टशैल्या प्रो. रहसविहारिद्विवेदिवर्यः सर्वान् समबोधयत्। अस्मिन् प्रसङ्गे माननीयकुलपतेः प्रो. गोपबन्धुमिश्रवर्यस्यापि प्रेरकोपस्थितिः आसीत्। अस्य विशिष्टव्याख्यानस्य सञ्चालनं प्रो. महेन्द्रकुमारदवे अकरोत्।




**पुराणकार्यशाला**